CAREERINDIA

**B**

**SL. No. : XX**

**CCE RR**
**UN-REVISED**

ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 50 ]
Total No. of Questions : 50 ]

[ ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 8
[ Total No. of Printed Pages : 8

**ಸಂಕೇತ ಸಂಖ್ಯೆ : 16-S**

**Code No. : 16-S**

# ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ

# Subject : First Language — SANSKRIT

# प्रथम भाषा — संस्कृतम्

**( ಹಳೆ ಪಠ್ಯಕ್ರಮ / Old Syllabus )**

**( ಪುನರಾವರ್ತಿತ ಶಾಲಾ ಅಭ್ಯರ್ಥಿ / Regular Repeater )**

ದಿನಾಂಕ : 21. 03. 2019 ]
ಸಮಯ : ಬೆಳಿಗ್ಗೆ 9-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 12-30 ರವರೆಗೆ ]
ಗರಿಷ್ಠ ಅಂಕಗಳು : 100 ]

[ Date : 21. 03. 2019
[ Time : 9-30 A.M. to 12-30 P.M.
[ Max. Marks : 100

### *ಪರೀಕ್ಷಾರ್ಥಿಗಳಿಗೆ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :*

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು 50 ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

### *परीक्षार्थिनां सामान्यसूचनाः*

1. अस्मिन् प्रश्नपत्रे पञ्चाशत् (50) वस्तुनिष्ठाः व्यक्तिनिष्ठाश्च प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति इति वा पर्यालोचयत ।
3. व्यक्तिनिष्ठानां वस्तुनिष्ठानाञ्च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकृताः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

इतः कर्तयत

**TEAR HERE TO OPEN THE QUESTION PAPER**
प्रश्नपत्रमुद्घाटयितुम् इतः कर्तयत

**Tear here**

www.careerindia.com

CAREERINDIA



# भागः - A

**( गद्य-पद्य-पूरकपाठाः )**

**( 62 अङ्काः )**

I. एकवाक्येन उत्तरं लिखत — 11 × 1 = 11

1. बाल्ये शास्त्रिमहोदयस्य गृहपरिसरः कथम् आसीत् ?
2. भोजः कुत्र हन्तव्यः ?
3. शल्यः कस्य सारथिः आसीत् ?
4. इदं सर्वं केन वास्यम् ?
5. भारतीयभावना निरन्तरं किं ददाति ?
6. अञ्जना कीदृशं सुतं प्रासूत ?
7. नाट्ये कति रसाः सन्ति ?
8. सतां विभूतिः किमर्थं भवति ?
9. कीदृशेन कर्मणा सौख्यं भवति ?
10. आहारार्थं किं कुर्यात् ?
11. दुर्योधनः कस्य सुतः ?

II. चतुर्थं पदं लिखत — 4 × 1 = 4

12. पराजिता – मोघलसेना :: शरणागतः — ........................।
13. जामदग्न्यः – परशुरामः :: राधेयः — .......................... ।
14. अर्जुनः – धीरोदात्तः :: धर्मराजः — .......................... ।
15. ध्रुवस्य माता – सुनीतिः :: उत्तमस्य माता — .......................... ।



www.careerindia.com

CAREERINDIA



III. लघूत्तराणि संस्कृतभाषया लिखत – 4 × 2 = 8

16. भोजस्य जन्मपत्रिकां दृष्ट्वा दैवज्ञः किमाह ?

17. पादपजातयः काः ? तासां जन्म कथं भवति ?

18. कविः नागराजन् महोदयः कीदृशीं मातरं नमामि इति वदति ?

19. जामदग्न्यः कर्णं किमर्थं शशाप ?

**अथवा**

नरस्य वृत्तं के जानन्ति ?

IV. श्लोकतात्पर्यं कर्णाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत – 2 × 2 = 4

20. यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।

तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ।।

21. आङ्गिको वाचिकश्चैव

आहार्यः सात्त्विकस्तथा ।

चत्वारोऽभिनया ह्यते

विज्ञेया नाट्यसंश्रयाः ।।

**अथवा**

ततं चैवावनद्धं च

घनं सुषिरमेव च ।

चतुर्विधं च विज्ञेयम्

आतोद्यं लक्षणान्वितम् ।।

V. कव्योः देश-काल-कृतीनां विषये लिखत – 2 × 3 = 6

22. वेदव्यासः ।

23. विद्वान् हेच्०वि० नागराजराव् ।



www.careerindia.com

CAREERINDIA



VI. यथानिर्देशम् उत्तरं लिखत – 3 × 3 = 9

24. भवद्दर्शनेन परमां निर्वृतिं प्राप्तोऽस्मि ।

क: पाठ: ? क: अवदत् ? कस्य दर्शनम् ?

25. विज्ञानप्रदर्शिनीं द्रष्टुं गच्छाम ।

क: पाठ: ? क: अवदत् ? प्रदर्शिनी कुत्र आयोजिता ?

26. विना दैवं न सिध्यति ।

क: पाठ: ? क: अवदत् ? कम् अवदत् ?

**अथवा**

जग्राह सहसा रविम् ।

क: पाठ: ? क: अवदत् ? कम् अवदत् ?

VII. दशवाक्यै: उत्तरं कर्णाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत – 3 × 4 = 12

27. वृत्रवधोपाय ज्ञातुम् आगतान् देवान् ब्रह्मदेव: किम् अवदत् ?

28. हनूमत: जननं बाल्यवृत्तान्त च पद्यानुगुणं लिखत ।

29. शिव: अमरनाथगुहाविषये पार्वतीं किम् अवदत् ? तां पुराणकथां विवृणुत ।

**अथवा**

हिमालय: भारतं कथं रक्षति ? विवृणुत ।

VIII. श्लोकं पूरयत – 1 × 4 = 4

30. सुखस्य दु:खस्य ..............................................................................

..............................................................................................।

..............................................................................................

.................................................................... ग्रथितो हि लोक: ।।

IX. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत – 4 × 1 = 4

31. जगतीतले बहवो भाषा: विराजन्ते । तासां सर्वसां भाषाणां जननी संस्कृतभाषा इति भारतीयानाम् अभिप्राय: । एषा भाषा अतीव सरला, सरसा, मधुरा च वर्तते । अस्यां भाषायां शब्दसम्पत्ति: अधिका अस्ति । वाल्मीकि-व्यास-भास-कालिदासादय: कवय: बहूनि काव्यानि नाटकानि च आरचयन् । कालिदासस्य ''अभिज्ञानशाकुन्तलम्'' नाटकं विश्वविख्यातम् अस्ति । अस्य 'मेघदूतम्' इति खण्डकाव्यम् अवलम्ब्य दूतकाव्यपरम्परा एव प्रारब्धा अभवत् ।

i) सर्वासां भाषाणां जननी का ?

ii) संस्कृतभाषा कथं वर्तते ?

iii) विश्वविख्यातं नाटकं किम् ?

iv) किम् अवलम्ब्य दूतकाव्यपरम्परा प्रारब्धा ?



www.careerindia.com

CAREERINDIA



## भागः - B

### (व्याकरणविभागः)

### (22 अङ्काः)

X. निम्नलिखितेषु प्रश्नेषु अपूर्णविवरणेषु वा प्रत्येकं चत्वारः विकल्पाः प्रदत्ताः । तेषु एकः एव शुद्धः उपयुक्तः वा वर्तते । सम्यक् उत्तरस्य चयनं कृत्वा क्रमाक्षरेण-सह लिखत — 10 × 1 = 10

32. 'विपिनम्' – अस्य समानार्थकपदम् इदं भवति –

(A) विपदम् (B) काननम्

(C) विमलम् (D) भवनम् ।

33. 'अघम्' – अस्य विरुद्धार्थकपदम् इदम् अस्ति –

(A) पापम् (B) मलम्

(C) पङ्कम् (D) पुण्यम् ।

34. रामः + आगच्छति – अत्र सन्धिरूपम् एवं भवति –

(A) रामो आगच्छति (B) रामागच्छति

(C) राम आगच्छति (D) राममागच्छति ।

35. पत्नी – अस्य अन्यलिङ्गरूपम् इदं भवति –

(A) पतिः (B) जाया

(C) कान्ता (D) पिता ।

36. वयम् – अत्र एषा विभक्तिः वर्तते –

(A) द्वितीया (B) चतुर्थी

(C) प्रथमा (D) षष्ठी ।

37. एतदुपरि – अत्र एषः सन्धिः भवति –

(A) श्चुत्वसन्धिः (B) जश्त्वसन्धिः

(C) अनुनासिकसन्धिः (D) अनुस्वारसन्धिः।

38. बालार्कः – अत्र एषः समासः भवति –

(A) अव्ययीभावः (B) द्वन्द्वः

(C) तत्पुरुषः (D) कर्मधारयः ।

www.careerindia.com

CAREERINDIA



39. बभूव – अत्र एषः लकारः वर्तते –

(A) लिट् (B) लोट्

(C) लट् (D) लङ् ।

40. अन्यपदार्थप्रधानः समासः एषः –

(A) बहुव्रीहिः (B) तत्पुरुषः

(C) अव्ययीभावः (D) द्वन्द्वः ।

41. एषु व्याकरणशुद्धं वाक्यम् इदं भवति –

(A) बालकं मोदकं रोचते (B) बालकाय मोदकं रोचते

(C) बालकेन मोदकं रोचते (D) बालकस्य मोदकं रोचते ।

42. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत – $1 \times 2 = 2$

a) स्वामिसन्देशं सः आनीतवान् ।

b) नगरे शोभमानम् उपवनं पश्य ।

43. प्रयोगपरिवर्तनं कुरुत – $1 \times 2 = 2$

a) बालकः पाठं पठितवान् ।

b) बालकैः धाव्यते ।

44. रेखाङ्कितपदम् अवलम्ब्य प्रश्ननिर्माणं कुरुत – $1 \times 2 = 2$

a) संस्कृतकविषु <u>कालिदासः</u> 'वरकविः' इति प्रसिद्धः ।

b) डा० सत्यव्रतशास्त्रिमहोदयः <u>लाहोरनगरे</u> अजायत ।

XI. वाक्ये विद्यमानं अलङ्कारं सलक्षणं विवृणुत – $1 \times 3 = 3$

45. ज्ञानामृतं पीत्वा तुष्टः ।

XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत – $1 \times 3 = 3$

46. भूतेषु किं च करुणां बहुली करोति ।

www.careerindia.com

CAREERINDIA



## भागः - C

### (रचनाविभागः)

### (16 अङ्काः)

XIII. संस्कृतभाषया अनुवादं कुरुत — 1 × 3 = 3

47. ಮೈಸೂರು ನಗರವು ಸಾಂಸ್ಕೃತಿಕ ಕೇಂದ್ರವೆಂದು ಪ್ರಸಿದ್ಧವಾಗಿದೆ. ಇಲ್ಲಿ ಪ್ರತಿವರ್ಷ ದಸರಾ ಮಹೋತ್ಸವವನ್ನು ಆಚರಿಸುತ್ತಾರೆ. ಅದನ್ನು ನೋಡಲು ದೇಶ–ವಿದೇಶಗಳಿಂದ ಜನರು ಬರುತ್ತಾರೆ.

Mysuru is regarded as a cultural centre. Every Year Dussehra festival is celebrated here. People across the world come here to see this.

XIV. कर्णाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत — 1 × 3 = 3

48. वृक्षाः परोपकारार्थं फलं यच्छन्ति । नद्यः परोपकाराय एव वहन्ति । इदं शरीरं परोपकारार्थमेव भवतु ।

XV. पत्रं लिखत — 1 × 5 = 5

49. मैसूरूनगरे विद्यमानस्य महाराजविद्यालयस्य छात्रः/छात्रा राजेशः/रजनी इति मत्वा दिनत्रयं विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत ।

**अथवा**

शैक्षणिकप्रवासार्थं धनं सम्प्रार्थ्य पितरं प्रति पत्रं लिखत ।

XVI. 50. एकं विषयम् अधिकृत्य प्रबन्धं लिखत — 1 × 5 = 5

i) परिसरसंरक्षणम्

ii) जनसंख्यास्फोटस्य कारणं निवारणोपायाः च

iii) समाचारपत्रम् ।

www.careerindia.com

www.careerindia.com